दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् माघकृष्णषष्ठी
पौषः 23 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-77 | 1 | जनवरी 08, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 पर्यटनविभागेन तत् त्वम् अर्थात् 'That's You' इति अभियानस्य आरम्भः कृतः, मन्दपर्यटनस्य अवधारणायाः प्रचारः भविष्यति

3 स्वराष्ट्रं परं वैभवन्नेतुम् अस्माकं भूमिका ज्ञातव्या ध्यातव्या च-आचार्यः महेश्वरः

4 भारतस्य राष्ट्रियराजमार्गप्राधिकरणेन गिनीज-विश्व-अभिलेखद्वयं स्थापितम्

## सोमनाथ-स्वाभिमान-पर्वणि सहभागं करिष्यति प्रधानमन्त्री नरेन्द्रमोदी

प्रधानमन्त्री नरेन्द्रमोदी रविवासरे गुजराते सोमनाथ-स्वाभिमान-पर्वणि सहभागं करिष्यति। अस्य पर्वणः अन्तर्गत सोमनाथे आवर्ष कार्यक्रमाः आयोजयिष्यन्ते। सोमनाथे सङ्घातस्य प्रथमाक्रमणस्य अस्मिन् वर्षे सहस्रवर्षाणि पूर्णानि भविष्यन्ति।

## एकविंशति-दिनाङ्के नव-दिल्ल्याः भारत-मण्डपे भविष्यति त्रिदिवसीयं भारत-अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-प्रबन्धन-सम्मेलनम्

अस्य मासस्य एकविंशति-दिनाङ्के नव-दिल्ल्याः भारत-मण्डपे त्रिदिवसीयं भारत-अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-प्रबन्धन-सम्मेलनम् आयोजिष्यते। एतत् सम्मेलनं भारत-निर्वाचन आयोगस्य तत्त्वावधाने भारतीय-अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-प्रबन्धन-संस्था अन्तरराष्ट्रीय-लोकतन्त्र-निर्वाचन-सहायता संस्थया सह संयुक्तरूपेण आयोज्यते। महानिदेशकः राकेश-वर्मा अवदत् यत् सम्मेलनस्य विषयः "सर्व-समावेशी-शान्तिपूर्ण-स्थितिस्थापक-सुस्थिर-विश्वस्य कृते लोकतन्त्रम्" इति अस्ति, यस्मिन् निर्वाचन प्रक्रियाः निर्वाचन-प्रबन्धन-सम्बद्धाः च विषयाः चर्च्यन्ते।

## इसरो द्वादश दिनाङ्के PSLV-C62 इति अभियानस्य प्रक्षेपणं करिष्यति

सङ्घटनम् अस्य मासस्य द्वादश दिनाङ्के PSLV-C62 इति अभियानस्य प्रक्षेपणं करिष्यति। सामाजिक-अन्तर्जाल-सन्देशे इस्रो संसूचितवान् यत् आन्ध्रप्रदेशस्य श्रीहरिकोटा-स्थितात् सतीश धवन स्पेस-केन्द्रात् प्रातः सप्तदशाधिक दशवादने उपग्रहस्य प्रक्षेपणं भविष्यति। अस्य अभियानस्य मुख्यभारः भू-निरीक्षण-उपग्रहः, ई. ओ. एस.-एन-1 इति अस्ति, यः रक्षा-अनुसन्धान-विकास-सङ्घटनेन रणनीतिक-प्रयोजनार्थं विकसितः अभासित-उपग्रहः अस्ति। एतद् अभियानं विविधभारतीय-अन्ताराष्ट्रिय-उपयोक्तृभ्यः अष्टदश सह-यात्री-उपग्रहान् अपि वहति।

# भारतस्य सम्बन्धाः पाकिस्तानेन सह तस्यातङ्कवादाय समर्थन-कारणेन यथावत् प्रवर्तिष्यन्ते-डॉ. एस् जयशङ्करः



विदेशमन्त्रिणा डॉ. एस् जयशङ्करेण आतङ्कवादिभ्यः प्रशिक्षण-प्रदानाय दशकेभ्यः शिविर-सञ्चालनाय च पाकिस्तानस्य आलोचना कृता। विदेशमन्त्री अवोचत् यत् वैश्विकपरिदृश्ये कूटिनीतिक-स्थितौ भारतस्य सम्बन्धाः पाकिस्तानेन सह तस्यातङ्कवादाय समर्थन-कारणेन यथावत् प्रवर्तिष्यन्ते। अमुना एतत् वक्तव्यम् अद्य लक्जमबर्ग नगरे भारतीय समुदायेन सह संवादे प्रदत्तम्। तेनोक्तं यत् जगति कोपि देशः प्रतिवेशिभिः सह तादृशः व्यवहारः न करोति यादृशो व्यवहारः पाकिस्तानेन क्रियते। डॉ. एस् जयशङ्करः सबलं प्रत्यपादयत् यत् भारतं प्रतिवेशिभिः सह तेषां नीतिनामनुणं व्यवहारं करिष्यति। पाकिस्तानं विरुध्य सिन्दूराभियानविषये विदेशमन्त्रिणा यूरोपीयदेशानां प्रतिक्रियाः अपि उल्लेखिताः। वेनेजुएला देशे अमेरिकीय-सैन्य-कार्याचरण-विषये विदेशमन्त्रिणा चिन्ता प्रकटिता। अमुना तत्रत्य जनानां सुरक्षा कल्याणं च अध्यर्थित। विदेशमन्त्री अवोचत् यत् अस्मिन् वर्षे यूरोपीय देशैः सह भारतस्य सम्बन्धेषु परिष्कारो भविष्यति। विदेशमन्त्रिणा यूरोपीय देशैः सह सम्बन्ध-सुदृढीकरणाय भारतीय-प्रवासिनां भूमिका लाधिता। तेन भारत-लक्जमबर्गयोः राजनीतिक-व्यापारिक-प्रौद्योगिक-क्षेत्रेषु महत्त्वपूर्ण-सम्बन्धाः अपि प्रकाशिताः।

# भारत-इस्राइल-देशौ आतंकवादं विरुध्य शून्य सहिष्णुतां प्रकटितवन्तौ



हिमसंस्कृतवार्ताः - प्रधानमन्त्री नरेन्द्रमोदी इस्राइल-देशस्य प्रधानमन्त्रिणा बेन्यामिन नेतन्याहु वर्येण सह दूरभाषे संवादम् अकरोत्। तेन भारत-इस्राइलदेशयोः रणनीतिक-सहभागितायाः दृढीकरणाय चर्चा कृता। उभाभ्यां नेतृभ्यां लोकतान्त्रिक मूल्यानां परस्पर-विश्वासस्य दूरदर्शि-दृष्टिकोणस्य च आधारे भारत-इस्राइल-रणनीतिक-सहभागितां द्रढयितुं प्राथमिकताः अभिज्ञाताः। उभाभ्याम् आतङ्कवादस्य सर्वाणि रूपाणि अभिव्यक्तियश्च कथमपि न सोढुं स्वीयं दृष्टिकोणं पुनः प्रकटितम्। आतङ्कवादं निराकर्तुं च प्रतिबद्धतायाः पुष्टिः कृता। उभाभ्यां नेतृभ्यां परस्परं नव-वर्षस्य शुभकामनाः प्रदत्ताः। देशद्वयस्य नागरिकेभ्यः शान्तेः समृद्धेश्च कामना कृता।

## सुभाषितम्

**एकमपि सतां सुकृतं विकसति,**
**तैलं यथा जले न्यस्तम्।**
**असतामुपकारशतं संकुचति,**
**सुशीतले जले घृतवत्।।**
**-महासुभषितसंग्रहः**

अर्थात्- सहृदय और सज्जन व्यक्तियों के प्रति किये एक शुभकार्य का समाज में व्यापक शुभ प्रभाव होता है जैसे जल में तेल डालने से वह पूरी सतह में फैल जाता है। परन्तु यदि दुर्जनों के प्रति चाहे सौ उपकार भी क्यों न कर दिये जायें वे उनका आदर नहीं करते तथा उसका प्रभाव अत्यन्त शीतल जल में घी डालने के समान होता है। जैसे घी ठोस होकर एक स्थान पर एकत्रित हो जाता है वैसे ही वह कार्य भी व्यर्थ हो जाता है।

दैनिकं ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily
Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message
saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केतः- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## दिल्ली-आरक्षिबलेन दिल्ल्यां रामलीला मैदान क्षेत्रं निकषा अवैधनिर्माणं विरुध्य पञ्च जनाः निगृहीताः

दिल्ली-आरक्षिबलेन दिल्ल्यां रामलीला मैदान क्षेत्रं निकषा अवैधनिर्माणं विरुध्य विहिते प्रयासे प्रस्तरक्षेप घटनायां पञ्च जनाः निगृहीताः। आरक्षिबलेन प्रकरणेस्मिन् प्राथमिकी अपि पञ्जीकृता। वार्ताहरैः सह वार्तालापं कुर्वन्, आरक्षिबलस्य उप-निदेशकः अवदत् यत् उच्चन्यायालयस्य निर्देशानुसारं देहली-नगरनिगमः ध्वंसम् अकरोत्। सः अवदत् यत् अस्यां घटनायां पञ्च आरक्षिणः अपि व्रणिताः।

# हिमाचलप्रदेश- विद्यालयशिक्षामण्डलेन निर्धारित-समयसारिण्यानुसारं मूल्याङ्कनं सम्पन्ने सति दशमी-द्वादशीकक्षयोः परिणामः अल्पतमकाले घोषितो भविष्यति




**हिमसंस्कृतवार्ताः- धर्मशाला।** शैक्षणिकसत्रे 2025–26 दशमी–द्वादशी कक्षयोः उत्तरपुस्तिकानां मूल्याङ्कनं यदि निर्धारितसमयसारिण्यानुसारं सम्पन्नं भवति, तर्हि हिमाचलप्रदेश-विद्यालयशिक्षामण्डलः अभूतपूर्वतः अल्पकाले परीक्षापरिणामं घोषितुं शक्नोति। शिक्षा मण्डलेन परीक्षापरिणामस्य घोषणातिथिः 30 अप्रैल निश्चिताऽस्ति। प्रथम अप्रैल दिने परीक्षाः समाप्ताः भविष्यन्ति, तदनन्तरं 2 अप्रैल दिनात् उत्तरपुस्तिकानां मूल्याङ्कनकार्यस्य आरम्भः कर्तुं निर्णयः कृतः। शिक्षाबोर्डेन परीक्षानन्तरं 18 दिनेभ्यः अन्तर्गतं मूल्याङ्कनकार्यं सम्पन्नं कर्तुं लक्ष्यं निर्धारितं, येन परिणामसम्बद्धाः अन्याः औपचारिकताः समये एव पूर्णाः कर्तुं शक्यन्ते। मूल्याङ्कनकार्यस्य समापनं 22 अप्रैल दिने कर्तुं लक्ष्यं निश्चितम्। ततः परम् अङ्कानां ऑनलाइनप्रविष्टिः, परीक्षणम्, अनुमोदनप्रक्रिया च पूर्णीकर्तुम् अष्टदिनात्मकः कालः निर्धारितः।उल्लेखनीयं यत् शैक्षणिकसत्रे 2024–25 परीक्षापरिणामः शिक्षा बोर्डेन 18 मई दिने घोषितः आसीत्, परन्तु अस्मिन् वर्षे बोर्डः तस्मादपि पूर्वं परिणामघोषणां कृत्वा नवरिकॉर्डं स्थापयितुं प्रयतते।

## निर्धारित समयसारिण्यानुसार एव परिणामः घोषितो भविष्यति- डॉ. राजेश

बोर्डस्य अध्यक्षः डॉ. राजेशशर्मा उक्तवान् यत् अस्मिन् वर्षे द्वादशी कक्षायाः परीक्षा–परिणामं अभूतपूर्वतः अल्पकाले घोषितुं लक्ष्यं निर्धारितम्। एतदर्थं मूल्याङ्कनकार्यस्य आरम्भात् आरभ्य अन्येषां सर्वासाम् औपचारिकतानां पूर्तये तिथीनां स्पष्टं निर्धारणं कृतम्, येन अल्पकाले एव परीक्षा–परिणामघोषणा सम्भवेत्। सः अवदत् यत् निश्चितसमये परिणामघोषणायै प्रदेशस्य अध्यापकानां, बोर्डकर्मचारिणां च सहयोगः अत्यावश्यकः अस्ति।

# एमआईएस- अन्तर्गतं सेबविक्रयणं कुर्वतां लघुसेबोत्पादकानां कृते महदाश्रयः; १०० पुटतः न्यूनं विक्रयणं कुर्वतां कृते राजस्वप्रपत्राणाम् आवश्यकता न भविष्यति





**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशस्य बृहत्तमस्य कृषक- फल- उद्यान- सङ्गटनस्य संयुक्तकृषकमञ्चस्य आग्रहस्य अनन्तरं राज्यसर्वकारेण लघु-फल-उद्यानानां कृते महदाश्रयः प्रदत्तः। ये फलवृक्षाः विपणीहस्तक्षेपयोजनायाः (MIS) अन्तर्गतं १०० तः न्यूनानि पुटकानि विक्रीतवन्तः तेषां कृते राजस्वस्य अभिलेखाः, यथा भू-अभिलेखाः, भू-जमाबंदी अन्ये भूमि-अभिलेखाः वा दातव्याः न भविष्यन्ति। सर्वकारीयनिर्देशानाम् अनन्तरं हिमाचलप्रदेशस्य उद्यानपदार्थ-विपणनप्रक्रियानिगमेन बुधवासरे अस्मिन् विषये अधिसूचना कृता। एचपीएमसीद्वारा प्रकाशिता अधिसूचना स्पष्टीकरोति यत् ये कृषकाः २०२५ तमस्य वर्षस्य एमआईएस-ऋतौ निगमस्य क्रयणकेन्द्रेषु १०० तः न्यूनानि सेबपुटकानि आनयन्ति, तेषां भुक्तिः केवलं फलानां प्राप्तेः आधारेण भविष्यति। एतादृशेषु सन्दर्भेषु राजस्वप्रपत्राणि दातुम् अनिवार्यं न भविष्यति। परन्तु १०० तः अधिकानि सेबपुटं विक्रीतवन्तः तेभ्यः राजस्वस्य अभिलेखाः आवश्यकाः भविष्यन्ति, भुक्तिनियमाः च समानाः एव भविष्यन्ति। संयुक्तकृषकमञ्चस्य संयोजकः हरीशचौहानः एतत् निर्णयं कृषकाणां, पलोत्पादकानां च कृते महान् विजयः इति उक्तवान्। सः अवदत् यत् लघु- सीमान्त- फल-उद्यानानां राजस्व-अभिलेख-प्राप्त्यर्थं महत्कष्टं भवति, येन भुक्तिविलम्बः भवति। मंचेन उद्यानमन्त्री जगतसिंहनेगी इत्यनेन सह एषः विषयः उक्तः, यः सकारात्मकं कार्यं कृत्वा एचपीएमसी इत्यस्मै व्यवस्थां परिवर्तयितुं निर्देशं दत्तवान्। हरीशचौहानः अवदत् यत् एषः निर्णयः विशेषतः लघुफलोत्पिदकानां कृते आश्रयं प्रदास्यति तथा च एमआईएस- अन्तर्गतं सेबक्रयणप्रक्रिया सरलं, पारदर्शकं, सुलभं च करिष्यति।

# पर्यटनविभागेन तत् त्वम् अर्थात् 'That's You' इति अभियानस्य आरम्भः कृतः, मन्दपर्यटनस्य अवधारणायाः प्रचारः भविष्यति





**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः हिमाचलप्रदेश- पर्यटनविभागस्य उपक्रमस्य 'तत् त्वम्' अर्थात् 'दैट्स यू' इति अभियानस्य शुभारम्भं कृतवान्। एतद् अभियानम् राज्यस्य पर्यटननीतौ महत्त्वपूर्णं परिवर्तनं चिह्नितं करोति, पारम्परिकपर्यटनस्थलेषु सीमितपर्यटनात् परं गत्वा मन्दपर्यटनस्य अवधारणां प्रवर्धयति। मुख्यमन्त्री उक्तवान् यत् राज्यस्य प्रवेशस्थानेषु, विमानस्थानकेषु, धरोहररेलस्थानकेषु च आगच्छन्तां पर्यटकानां स्वागतार्थं विशेषतया एतद् अभियानं निर्मितम् अस्ति, येन यात्रिकाणां हिमालयप्रकृतेः च मध्ये गभीरं व्यक्तिगतं च सम्बन्धं स्थापयति।सुखविन्दरसिंहसुक्खु इत्यनेन उक्तं यत् मन्दपर्यटनं प्रति एष उपक्रमः पर्यावरणस्वास्थ्यस्य विषये राज्यस्य प्रतिबद्धताम् अपि प्रदर्शयति। अल्पलोकप्रियग्रामेषु दीर्घकालं यावत् स्थातुं प्रोत्साहयित्वा स्थानीयसंस्कृत्या सह संलग्नाः भूत्वा ग्राम्यक्षेत्राणां सौन्दर्यं प्रकाशयितुं, लोकप्रियपर्यटनस्थलेषु प्रभावं न्यूनीकर्तुं, स्थानीय- अर्थव्यवस्थां सुदृढं कर्तुं, पर्यावरणस्य प्रचारं कर्तुं च अस्य अभियानस्य उद्देश्यम् अस्ति।पर्यटननिदेशकः विवेकभाटिया इत्यनेन सूचितं यत् चण्डीगढ-शिमला-प्रवेशमार्गः, गग्गल- भुन्तर- विमानस्थानकं, ऐतिहासिक-कालका- शिमला- क्रीडनक- रेलमार्गः च इत्यादिषु प्रमुखेषु आगमनस्थानेषु एतत् अभियानं प्रारभ्यते। अस्मिन्नवसरे मुख्यमन्त्रिणः प्रधानपरामर्शकः (नवाचार, डिजिटल प्रौद्योगिकी एवं शासनम्) गोकुलबुटेलः अन्ये च वरिष्ठाधिकारिणः अपि उपस्थिताः आसन्।

# पंचायतनिर्वाचने उच्चन्यायालये श्रवणं पूर्णम्, निर्णयः आरक्षितः

हिमसंस्कृतवार्ताः - संजयः जोशी। हिमाचलप्रदेशे प्रस्तावितं पंचायतनिर्वाचनसम्बद्धं जनहितयाचिकानां (पी.आइ.एल.) हिमाचलप्रदेश-उच्चन्यायालयेन पुनः श्रवणं कृतम्। विगतदिनानि यावत् प्रकरणेन सम्बद्धानां सर्वेषां पक्षानाम् तर्कं श्रुत्वा उच्चन्यायालयस्य विभागपीठिका याचिकाकर्तुः राज्यसर्वकारस्य च तर्कं पूर्णतया श्रुत्वा स्वनिर्णयं आरक्षितवती।न्यायालयेन अपि स्पष्टीकृतं यत् अस्मिन् विषये पक्षद्वयात् अधिकः तर्कः न स्वीक्रियते। उच्चन्यायालयेन सूचितं यत् आगामिदिनद्वये राज्ये पंचायतनिर्वाचनस्य तिथौ अन्तिमनिर्णयः घोषितः भवितुम् अर्हति।श्रवणकाले राज्यसर्वकारस्य अधिवक्ता न्यायालयं सूचितवान् यत् राज्ये सम्प्रति परिसीमनप्रक्रिया प्रचलति। अस्याः प्रक्रियायाः अन्तर्गतं सम्बन्धितक्षेत्रेषु आक्षेपाः आमन्त्रिताः सन्ति, यत्र जनवरी ११ दिनाङ्कस्य समयसीमा निर्धारिता अस्ति ।सर्वकारेण एतदपि तर्कितम् यत् केचन महत्त्वपूर्णाः प्रशासनिकाः संवैधानिकाः च प्रक्रियाः पूर्णाः कर्तव्याः सन्ति। एतेषु आधारेषु राज्यसर्वकारेण पंचायतनिर्वाचनं कर्तुं षड्मासस्य समयः याचितः।जनहितयाचिका-प्रवेशित-पक्षेण न्यायालये तर्कः कृतः यत् राज्यस्य पंचायतानां कार्यकालः जनवरी-मासस्य ३१ दिनाङ्के समाप्तः भवति, अतः तदनन्तरं तत्क्षणमेव निर्वाचनं कर्तुं संवैधानिकं दायित्वम् अस्ति याचिकाकर्ता निर्वाचने यत्किमपि विलम्बं भवति तत् अयुक्तम् इति उक्तवान्।माननीयः उच्चन्यायालयः पक्षयोः तर्कं सम्यक् श्रुत्वा सर्वाणि तथ्यानि विचार्य ततः विषये स्वनिर्णयं आरक्षितवान् । अधुना राज्ये पंचायतनिर्वाचनस्य तिथ्याः, अग्रे प्रक्रियायाः च विषये स्थितिः सम्पूर्णतया उच्चन्यायालयस्य आगामिनिर्णयस्य उपरि निर्भरं भविष्यति।

# स्वराष्ट्रं परं वैभवन्नेतुम् अस्माकं भूमिका ज्ञातव्या ध्यातव्या च- आचार्यः महेश्वरः



**हिमसंस्कृतवार्ताः- सरोज शर्मा** हिमाचलप्रदेशस्य ऊनामण्डलस्य श्रीसुन्दरनारायणगुरुकुले जायमाने संस्कृतभारत्याः बिलासपुरविभागीयस्य प्रबोधनवर्गे संस्कृतभारती हिमाचलप्रान्तस्य न्यासीसदस्यः आचार्यः महेश्वरः चर्चासत्रे वर्गार्थिनां कृते मार्गदर्शनम् अकरोत्। महोदयः उक्तवान् यत् अस्माभिः मनुष्यः जन्मः प्राप्तः अस्ति। ईश्वरेण प्रेषिताः, ईश्वरेण निर्मिताः वयम्। ईश्वरः उत्तमाय कार्याय, उत्तमानां जनानां चयनं करोति तर्हि वयम् उत्तमाः जनाः उत्तमे कार्ये संलग्नाः स्मः। वयं सर्वे सामान्यचिन्तकाः न स्मः ऋषिपरम्परा अनुगामिनः वयम्। अस्माकं लक्ष्यम् अस्ति, समाजस्य सेवा करणीया यथा गीतेषु अपि अस्ति-

**'जीवनस्य लक्ष्यमेव लोकसेवनव्रतम्।**
**सेवना हि जीवनं सार्थकं फलान्वितम्।'**

एतादृशस्य लक्ष्यस्य अस्माभिः चिन्तनं करणीयम् तदा समाजे परिवर्तनं भवितुं शक्यते। यदि लघु-लघुकीटाः पन्तङ्गाः स्वकार्यं साधितवन्त, सर्वदा स्वकार्ये संलग्नाः भवन्ति तर्हि वयं तु मनुष्याः स्मः। वयं तु सर्वाणि कार्याणि साधयितुं शक्नुमः। वयं इच्छामः यत् मत्त समाजे परिवर्तनं भवेत्, मत् संस्कृते परिवर्तनं भवेत्, मत् लघु- लघु बालानां व्यक्तित्वनिर्माणं भवेत् तदर्थं पूर्वं स्वपरिवर्तनं आवश्यकम्। सुप्तानां संस्कृतसिंहानां, सुप्तानां भारतीयानां, सुप्तानां युव- युवतीनां परिवर्तनं संस्कृतभारती करोति। अस्माकं चिन्तनं भवेत् यत् मया स्वजीवनं, स्वचित्तं, स्वसमर्पणं भूमिमात्रे दातव्यम्। वयं सङ्कल्पं वदामः- संस्कृतस्य कृते जीवन्, संस्कृतस्य कृते यजन्। तर्हि अस्माकं समर्पणं समाजाय अस्ति देशाय अस्ति। यदा वयं एकेन संघटनेन सः युक्ताः भवामः एकेन चित्तेन कार्यं कुर्मः तर्हि सर्वाणि कार्याणि साधयितुं शक्नुमः। संस्कृतद्वारा एव स्वकीयं राष्ट्राय वयं पुनः विश्वगुरुत्वं प्रदातुं शक्ताः भविष्यामः।

# जवाहरलालनेहरुविश्वविद्यालये प्रधानमंत्रिणः गृहमन्त्रिणः च विरुद्धं घोषोद्घोषं वामपक्षस्य काङ्ग्रेसस्य च कुण्ठायाः प्रतीकम् अस्ति- जयरामठाकुरः



**हिमसंस्कृतवार्ताः- शिमला।** पूर्वमुख्यमन्त्री, विपक्षस्य नेता च जयरामठाकुरः उक्तवान् यत् जवाहरलालनेहरूविश्वविद्यालये प्रधानमन्त्री नरेन्द्रमोदी- गृहमन्त्री अमितशाहयोः विरुद्धं ये आपत्तिजनकाः अशोभनाः च घोषाः उद्घताः, तत् ज्ञात्वैव घृणित-षड्यंत्रस्य भागः वर्तते। एषा घटना वाम-काङ्ग्रेस-विचारधाराणां निराशां उजागरयति, यत्र सत्ताताः, जनसमर्थनात् च वंचितः नैतिकता, शिष्टाचारः, लोकतान्त्रिकमूल्यानि च सर्वथा परित्यक्तम् अस्ति अभिव्यक्तिस्वातन्त्र्यस्य नाम्ना एतादृशाः दुर्भावनाः न केवलं निन्दनीयाः अपि तु देशस्य प्रतिष्ठितशिक्षणसंस्थानां गौरवम् अपि कलङ्कितं करोति।

विपक्षस्य नेता जयरामठाकुरः अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी गृहमन्त्री अमितशाहः च देशवासिनां हृदये निवसतः, राष्ट्रसेवां प्रति तेषां प्रतिबद्धता ऐतिहासिकी वर्तते। अद्य नरेन्द्रमोदिनः नेतृत्वे देशः विश्वस्य चतुर्थः बृहत्तमः अर्थव्यवस्था अभवत्, सुशासनं च प्रत्येकं नागरिकं यावत् प्राप्तम्। लक्षकोटिमूल्यानां जनकल्याण- परियोजनानां १२ वर्षाणि यावत् अबाधितरूपेण प्रचलन्ति। इदानीम् अमितशाहस्य नेतृत्वे देशस्य आन्तरिकसुरक्षा अभेद्यरूपेण एव वर्तते। नक्सली-रक्तवीथयः केवलं कतिपयेषु किलोमीटर-पर्यन्तं संकुचिताः, अतः शीघ्रमेव एतत् पूर्णतया निराकृतं भविष्यति। देशस्य प्रगतिः, वर्धमानशक्तिः, शान्तिः च केषाञ्चन व्यक्तिनां कृते स्वीकार्यं न भवति, ये कुण्ठायाः कारणात् एतादृशानां कार्याणाम् आश्रयं कुर्वन्ति।

एतादृशानां व्यक्तिनां दुर्भावनापूर्णचिन्तनं, नारावादनं च न राष्ट्रस्य मनोबलं क्षीणं करिष्यति, न च जनविश्वासं दुर्बलं करिष्यति। देशस्य चेतननागरिकाः पूर्वम् एतादृशीम् नकारात्मकराजनीतिं नाङ्गीकृतवन्तः, भविष्ये अपि उपयुक्तम् उत्तरं दास्यन्ति। बिहार-दिल्ली-प्रदेशयोः काङ्ग्रेसनेतृणां मञ्चे प्रधानमन्त्रिणः दुर्व्यवहारः अभवत्, तस्य परिणामः काङ्ग्रेस-सहकारिभिः च अभवत्। भविष्ये अपि एतादृशचिन्तनयुक्ताः जनसमूहेन अपमानिताः भविष्यन्ति। सः अवदत् यत् सर्वकारेण प्रशासनेन च एतस्याः घटनायाः गम्भीरतापूर्वकम् अन्वेषणं कृत्वा अपराधिनां विरुद्धं कठोरकार्याणि कर्तव्यानि, येन शैक्षिकपरिसराः राजनैतिक- षड्यंत्रस्य, अराजकतायाः च केन्द्रं न भवितुं निवारयितुं शक्यन्ते।

# करुणामूलकनियोगाय अधुना निदेशालयः नियुक्तिपत्राणि निर्गमिष्यति सर्वकारेण नीतौ संशोधनं कृतम्



**हिमसंस्कृतवार्ताः- शिमला।** हिमाचलप्रदेशसर्वकारेण करुणामूलक- जीविकानीत्याम् आंशिकरूपेण संशोधनं कृत्वा कनिष्ठकार्यालयसहायकपदम् एकीकृतव्यवस्थायाः अन्तर्गतम् आनेतुं निर्णयः कृतः। सम्बन्धितः आदेशः प्रधानवित्तसचिवेन कृतम्। सर्वकारस्य आदेशानुसारं करुणापूर्णनियुक्तिकरणस्य अधिकारः पूर्वं सम्बन्धितप्रशासनिकविभागस्य एव आसीत्। संशोधितप्रावधाने एतत् समानं वर्तते, परन्तु कनिष्ठकार्यालयसहायकरूपेण (IT) कार्यप्रशिक्षुपदेषु करुणापूर्णनियुक्तिप्रक्रियायां परिवर्तनं कृतम्। नवीनव्यवस्थानुसारं एतादृशेषु प्रकरणेषु सम्बन्धितविभागः सर्वाः आवश्यकाः औपचारिकताः पूर्वापेक्षया च सम्पन्नं कृत्वा कार्मिकविभागस्य अन्तर्गतनियुक्तिनिदेशालये प्रस्तावं प्रस्तौति। एतेषु प्रकरणेषु नियुक्तिनिदेशालयः औपचारिकनियुक्तिप्रस्तावः नियुक्तिपत्राणि च निर्गमिष्यति। एतेन एकरूपे केन्द्रीकृतरूपरेखायाः अन्तर्गतं कनिष्ठ-कार्यालयसहायकपदेषु करुणामूलकनियुक्तिः आनेतुं साहाय्यं भविष्यति। वित्तविभागेन स्पष्टीकृतं यत् अस्य संशोधनस्य उद्देश्यं नीतिं सुव्यवस्थितं कर्तुं प्रक्रियां पारदर्शकं प्रभावी च बृहत्तरजनहिताय भवति। सर्वेभ्यः प्रशासनिकविभागेभ्यः निर्देशः दत्तः यत् एतत् संशोधनं सर्वेषां सम्बन्धितपदाधिकारिणां शाखानां च सूचनायां आनयन्तु, तस्य दृढतारूपेण अनुपालनं सुनिश्चितं कुर्वन्तु। अस्य आदेशस्य प्रतिलिपिः राज्यपालसचिवालयाय, सर्वेभ्यः मण्डलायुक्तेभ्यः, विभागप्रमुखेभ्यः, हिमाचलप्रदेश- लोकसेवा- आयोगाय, हिमाचलप्रदेश- राज्यचयन- आयोगाय, उच्चन्यायालयाय, सार्वजनिकक्षेत्रस्य उपक्रमेभ्यः, स्वायत्तसंस्थाभ्यः च प्रेषिता अस्ति।

# छत्तीसगढे नक्सलात्मसमर्पणम्- षड्विंशति-नक्सलवादिभिः आत्मसमर्णं कृतम्

छत्तीसगढस्य सुकमा-जनपदे षड्विंशति-नक्सलवादिभिः आत्मसमर्णं कृतम्। एतेषु त्रयोदश-नक्सलवादिषु षत्रिंशल्लक्ष-रूप्यकाणां पुरस्कारः आसीत्। आरक्ष्यधीक्षकस्य किरण चव्हाणस्य अनुसारं सप्त महिलाः समेत्य एतैः नक्सलवादिभिः पूना मार्गेम पुनर्वासाभियानस्य अन्तर्गत वरिष्ठारिणः सीआरपीएफ इति बलस्य अधिकारिणां च समक्षम् आत्मसमर्पणं कॉतम्। तेनोक्तं यत् एते माओवादिनः पीपल्स लिबरेशन गुरिल्ला आर्मी (PLGA) बटालियन, इत्यस्य दक्षिण-बस्तर-सम्भागस्य आंध्र ओडिशा सीमायां च सक्रियाः आसन्। सममेव इमे छत्तीसगढस्य अबूझमाड़, सुकमा जनपदयोः ओडिशायाश्च सीमवर्ति-क्षेत्रेषु हिंसायाः घटनासु सम्मिलिताः आसन्। आत्मसमर्पण-कर्तृभ्यः प्रत्येकं नक्सलवादिभ्यः पञ्चाशत् सहस्र-रूप्यकाणां साहाय्यं प्रदीयते। प्रशासनस्य नीतेः अनुसारं तेषां पुनर्वासो विधास्यते।

# भारतस्य राष्ट्रियराजमार्गप्राधिकरणेन गिनीज-विश्व-अभिलेखद्वयं स्थापितम्





भारतस्य राष्ट्रियराजमार्गप्राधिकरणेन (एनएचएआई) षट्-लेन-बेङ्गलूरु-कदपा-विजयवाडा-आर्थिकमार्गस्य वनवोलु-वंकरकुण्टा-खण्डे बिटुमिनस-कंक्रीटं स्थापयित्वा गिनीज-विश्व-अभिलेखद्वयं स्थापितम्। एनएचएआइ-संस्थायाः सामाजिकमीडियासन्देशे- उक्तं यत् ३४३ कि.मी.पर्यन्तं व्याप्तेन बेङ्गलूरु-कडपा-विजयवाडा-आर्थिकमार्गे कर्णाटक-आन्ध्र-प्रदेशयोः मध्ये अन्तर्राज्यसंपर्कं सुदृढं भविष्यति। द्रुततरं, सुरक्षिततरं, निर्विघ्नं च यातायातस्य माध्यमेन व्यापारं, पर्यटनं, क्षेत्रीय-आर्थिकविकासं च वर्धयिष्यति । प्राधिकरणेन उक्तं यत् एताः अभिलेखनिर्धारणसाधनाः विश्वस्तरीयराष्ट्रीयराजमार्गसंरचनानां विकासाय देशस्य वर्धमानक्षमतां प्रतिबद्धतां च प्रतिबिम्बयन्ति। एनएचएआई इत्यनेन उक्तं यत् एनएच-५४४जी इत्यस्य वनवोलु-वंकरकुन्त-ओडुलापल्ले-खण्डे गिनीज-विश्व-अभिलेखद्वयं स्थापयितुं सम्प्रति प्रयत्नाः प्रचलन्ति।

# संचारमन्त्रालयेन कृषिकृषककल्याणमन्त्रालयेन ग्रामीणविकासमन्त्रालयेन च सह सहमतिपत्रद्वये हस्ताक्षरं कृतम्



संचारमन्त्रालयेन नवीदिल्लीनगरे कृषिकृषककल्याणमन्त्रालयेन ग्रामीणविकासमन्त्रालयेन च सह सहमतिपत्रद्वये हस्ताक्षरं कृतम्। एतेषां ज्ञापनपत्राणां उद्देश्यं ग्रामीणनागरिकाणां कृषकाणां च कृते भ्रान्तसूचनानां निराकरणमस्ति। अस्मिन् अवसरे वदन् संचारमन्त्री ज्योतिरादित्य सिन्धिया इत्यनेन उक्तं यत् डाकविभागस्य कृषिकृषककल्याणमन्त्रालयस्य च मध्ये हस्ताक्षरितेन ज्ञापनपत्रेण अप्रमाणितकीटनाशकानां दीर्घकालीनविषयः सम्बोधितः भविष्यति। सः अवदत् यत् अनया सन्ध्या प्रत्येकं कीटनाशकस्य प्रतिरूपकस्य QR कूटाङ्कः भविष्यति। सः अपि अवदत् यत् पूर्वदशपञ्चदशदिवसीयप्रक्रियायाः स्थाने अधुना द्वित्रिदिनान्तरे प्रतिरूपकानि परीक्षणप्रयोगशालासु प्राप्नुयुः। ग्रामीणविकासमन्त्रालयेन सह हस्ताक्षरितस्य ज्ञापनपत्रस्य विषये सिन्धियामहोदयेन उक्तं यत् एषा सन्धिः भारतडाकभुगतानबैङ्केन सह एकीकरणद्वारा स्वसहायतासमूहेन सह सम्बद्धानां प्रायः १२ कोटिमहिलानां सहितं ग्रामीणजनानाम् सशक्तिकरणं प्रति केन्द्रितः अस्ति। सः अवदत् यत् अस्मिन् ज्ञापनपत्रे इलेक्ट्रॉनिक-टैब्लेट्, नकद-स्थानांतरणं, विक्रय-बिन्दु-यन्त्राणि, प्रमाणपत्राणि च माध्यमेन व्यापकं प्रशिक्षणं प्रदत्तं भविष्यति। कृषिः कृषककल्याणमन्त्री शिवराजसिंहचौहानः कृषिः ग्रामीणविकासः च देशस्य अर्थव्यवस्थायाः मेरुदण्डः इति उक्तवान्। सः अवदत् यत् एषा सन्धिः ग्राम्यजनानाम् महिलानां च अतिरिक्तजीविकायाः अवसरान् प्रदास्यति, तथैव बैंकसेवासु प्रवेशं च प्राप्स्यति। श्रीसिंहः अवदत् यत् डाकजालस्य ग्रामीणवित्तीयसेवाभिः सह एकीकरणद्वारा उपक्रमेण लाभार्थीनां मासिक-आयस्य १५ तः ३० सहस्ररूप्यकाणां वृद्धिः भविष्यति इति अपेक्षा अस्ति। उभौ मन्त्रिणौ अवदन् यत् एषा अन्तरमन्त्रालयीयपरिकल्पना संचार, कृषि, ग्रामीणविकासमन्त्रालयानाम् अन्तर्गतं समग्रं सर्वकारीयं दृष्टिकोणं प्रतिबिम्बयति। एषः उपक्रमः स्वावलम्बितभारतस्य व्यापकग्रामीणविकासस्य च दृष्टिकोणस्य समर्थनं करिष्यति।



हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः

# वार्तासंवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
काव्या- नमस्ते नन्दिनि। अद्य मया एका अद्भुता वार्ता पठिता। एकेन सप्तवर्षीय-बालकेन सप्त-महाद्वीपानां भ्रमणं कृतम्। तस्य नाम 'वैल्डर' इति अस्ति। बाल्यकाले एव तेन एतत् असाधारणं कार्यं साधितम्।
नन्दिनी- सत्यम्। तस्य वैल्डर-बालकस्य प्रज्ञा विस्मापकी। परं चीनदेशे केनचित् पत्या विलक्षणं दानं प्राप्तम्। तस्य रुग्णायाः पत्न्याः कृते पञ्चाशत्-टन-परिमिताः मिष्टालुकाः जनैः प्रदत्ताः।
काव्या- मिष्टालुकाः? इतोऽपि विस्मापकम्। पत्न्याः उपचाराय जनानाम् एवम् सहयोगः।
नन्दिनी- आम्। तथापि अपरः विचित्रः समाचारः चीनदेशादेव आगतः। पर्यटकाभ्यां दम्पतीभ्यां स्वशिशवः उद्यान-रक्षकस्य समीपे त्यक्ताः। तदा स्थानीय-जनैः एव तेषां पालनं कृतम्।
काव्या- पितृभ्यां शिशवः त्यक्ताः इति? एतत् श्रुत्वा अहं स्तब्धा। परं जनैः साधु कृतम्।
नन्दिनी- तेषां जनानां स्नेहः प्रशंसनीयः। किन्तु अन्यस्मिन् वृत्तान्ते केनचित् प्रबन्धकेन क्रूरता दर्शिता। तेन उक्तं यत् रुग्णा माता आश्रय-गृहे स्थापनीया इति।
काव्या- आश्रय-गृहे? एतत् श्रुत्वा मया खेदः अनुभूतः। अतः एव तेन कर्मकरेण कार्यं त्यक्तम् खलु?
नन्दिनी- आम्, तेन त्यागपत्रं दत्तम्। अद्यतनः कार्यक्रमः अत्रैव समाप्तः।
काव्या- धन्यवादः नन्दिनि! श्वः पुनः मेलिष्यामः। नमो वः।



## लघुकथा-“काकात् काकशिशुः पटुतरः”

कश्मिंश्चित् वृक्षे एकः काकः स्वभार्यया सह निवसति स्म। नीडे तयोः एकः वर्धमानः नवजातशिशुरपि आसीत्। वर्धमानं शिशुं विलोक्य एकस्मिन् दिने काकः तं सम्बोधितवान्-
भो पुत्र! यद्यपि मनुष्येभ्यः सह काकजात्योः स्वाभाविक शत्रुता नास्ति तथापि मानुषात् सुरक्षा आवश्यकीया वर्तते।
**काकशिशुः-** शत्रुता नास्ति तथापि सुरक्षा कथम् आवश्यकी तात!?
**काकः-** मानवेभ्यः ध्वक्षाणां कर्कशा ध्वनिः न रोचते। तेन कारणेन ते करतलध्वनिना प्रस्तरखण्डप्रहारेण वा अस्मान् स्थानपरिवर्तनाय विवशं कुर्वन्ति। यद्यपि अस्मभ्यं खाद्यसामग्री मानवसामीप्येन एव प्राप्ताः भवन्ति, येन कारणेन तेषां सामीप्यता आवश्यकी भवति।
**काकशिशुः-** तात! मानवेभ्यः सुरक्षा कथं करणीया...?
**काकः-** यदा कश्चन भूमेः प्रस्तरखण्डम् उत्थापयति तदा तत्स्थानात् पलायनमुचितम्।
**काकशिशुः-** यदि कश्चन गृहादेव प्रस्तरखण्डं ग्रन्थ्यां स्थाप्य आगच्छति तदा किं करणीयम्...?
**काकः-** त्वं जन्मना एव चतुरः। अस्माकं अवबोधनस्य आवश्यकता तुभ्यं नास्ति। गच्छ! पुत्र...! स्वं पक्षं प्रसार्य संसारलीलां पश्य ...!
चिरंजीवी भव...!

लेखकः-मोती प्रसाद साहू
अटल-आवासीय-विद्यालयः, सोनभद्रम्

## "लौकिकन्यायकोशः“
## "घरट्टन्यायः"

घरट्टो नाम धान्यकुट्टनयन्त्रम्। धान्यकुट्टनस्य कृते एक एव शिलाखण्डः पर्याप्तो न भवति। द्वयमावश्यकम्। संसारस्य कृते द्वयोः आवश्यकता विद्यते इति अनेन बोध्यते।

डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्